श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ पञ्चविंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चविंशत्यधिकशततमः सर्गः ॥

## हनुमता निषादराजं गुहं श्रीभरतं चोपगम्य श्रीरामागमनस्य सूचनं ततः प्रसन्नेन भरतेन तस्माद् उपहारं दातुमुद्घोषणं च

अयोध्यां तु समालोक्य चिन्तयामास राघवः।
प्रियकामः प्रियं रामस्ततस्त्वरितविक्रमः ॥ **6.125.1** ॥

चिन्तयित्वा ततो दृष्टिं वानरेषु न्यपातयत्।
उवाच धीमांस्तेजस्वी हनूमन्तं प्लवङ्गमम् ॥ **6.125.2** ॥

अयोध्यां त्वरितो गत्वा शीघ्रं प्लवगसत्तम।
जानीहि कच्चित् कुशली जनो नृपतिमन्दिरे ॥ **6.125.3** ॥

शृङ्गवेरपुरं प्राप्य गुहं गहनगोचरम्।
निषादाधिपतिं ब्रूहि कुशलं वचनान्मम ॥ **6.125.4** ॥

श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरम्।
भविष्यति गुहः प्रीतः स ममात्मसमः सखा ॥ **6.125.5** ॥

अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च।
निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः ॥ **6.125.6** ॥

भरतस्तु त्वया वाच्यः कुशलं वचनान्मम।
सिद्धार्थं शंस मां तस्मै सभार्यं सहलक्ष्मणम् ॥ **6.125.7** ॥

हरणं चापि वैदेह्या रावणेन बलीयसा।
सुग्रीवेण च संवादं वालिनश्च वधं रणे॥ **6.125.8** ॥

मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया।
लङ्घयित्वा महातोयमापगापतिमव्ययम्॥ **6.125.9** ॥

उपयानं समुद्रस्य सागरस्य च दर्शनम्।
यथा च कारितः सेतू रावणश्च यथा हतः॥ **6.125.10** ॥

वरदानं महेन्द्रेण ब्रह्मणा वरुणेन च।
महादेवप्रसादाच्च पित्रा मम समागमम्॥ **6.125.11** ॥

उपयातं च मां सौम्य भरताय निवेदय।
सह राक्षसराजेन हरीणामीश्वरेण च॥ **6.125.12** ॥

जित्वा शत्रुगणान् रामः प्राप्य चानुत्तमं यशः।
उपायाति समृद्धार्थः सह मित्रैर्महाबलैः॥ **6.125.13** ॥

एतच्छ्रुत्वा यमाकारं भजते भरतस्ततः।
स च ते वेदितव्यः स्यात् सर्वं यच्चापि मां प्रति॥ **6.125.14** ॥

ज्ञेयाः सर्वे च वृत्तान्ता भरतस्येङ्गितानि च।
तत्त्वेन मुखवर्णेन दृष्ट्या व्याभाषितेन च॥ **6.125.15** ॥

सर्वकामसमृद्धं हि हस्त्यश्वरथसङ्कुलम्।
पितृपैतामहं राज्यं कस्य नावर्तयेन्मनः॥ **6.125.16** ॥

सङ्गत्या भरतः श्रीमान् राज्येनार्थी स्वयं भवेत्।
प्रशास्तु वसुधां सर्वामखिलां रघुनन्दनः॥ **6.125.17** ॥

तस्य बुद्धिं च विज्ञाय व्यवसायं च वानर।
यावन्न दूरं याताः स्मः क्षिप्रमागन्तुमर्हसि॥ **6.125.18** ॥

इति प्रतिसमादिष्टो हनूमान् मारुतात्मजः।
मानुषं धारयन् रूपमयोध्यां त्वरितो ययौ॥ **6.125.19** ॥

अथोत्पपात वेगेन हनूमान् मारुतात्मजः।
गरुत्मानिव वेगेन जिघृक्षन्नुरगोत्तमम्॥ **6.125.20** ॥

लङ्घयित्वा पितृपथं विहगेन्द्रालयं शुभम्।
गङ्गायमुनयोर्भीमं समतीत्य समागमम्॥ **6.125.21** ॥

शृङ्गवेरपुरं प्राप्य गुहमासाद्य वीर्यवान्।
स वाचा शुभया हृष्टो हनूमानिदमब्रवीत्॥ **6.125.22** ॥

सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः।
ससीतः सह सौमित्रिः स त्वां कुशलमब्रवीत्॥ **6.125.23** ॥

पञ्चमीमद्य रजनीमुषित्वा वचनान्मुनेः।
भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यत्रैव राघवम्॥ **6.125.24** ॥

एवमुक्त्वा महातेजाः सम्प्रहृष्टतनूरुहः।
उत्पपात महावेगाद् वेगवानविचारयन्॥ **6.125.25** ॥

सोऽपश्यद् रामतीर्थं च नदीं वालुकिनीं तथा।
वरूथीं गोमतीं चैव भीमं शालवनं तथा॥ **6.125.26** ॥

प्रजाश्च बहुसाहस्रीः स्फीताञ्जनपदानपि।
स गत्वा दूरमध्वानं त्वरितः कपिकुञ्जरः॥ **6.125.27** ॥

आससाद द्रुमान् फुल्लान् नन्दिग्रामसमीपगान्।
सुराधिपस्योपवने यथा चैत्ररथे द्रुमान्॥ **6.125.28** ॥

स्त्रीभिः सपुत्रैः पौत्रैश्च रममाणैः स्वलङ्कृतैः।
क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम्॥ **6.125.29** ॥

ददर्श भरतं दीनं कृशमाश्रमवासिनम्।
जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम्॥ **6.125.30** ॥

फलमूलाशिनं दान्तं तापसं धर्मचारिणम्।
समुन्नतजटाभारं वल्कलाजिनवाससम्॥ **6.125.31** ॥

नियतं भावितात्मानं ब्रह्मर्षिसमतेजसम्।
पादुके ते पुरस्कृत्य प्रशासन्तं वसुन्धराम्॥ **6.125.32** ॥

चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात्।
उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः॥ **6.125.33** ॥

बलमुख्यैश्च युक्तैश्च काषायाम्बरधारिभिः।
नहि ते राजपुत्रं तं चीरकृष्णाजिनाम्बरम्॥ **6.125.34** ॥

परिभोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलाः।
तं धर्ममिव धर्मज्ञं देहबन्धमिवापरम्॥ **6.125.35** ॥

उवाच प्राञ्जलिर्वाक्यं हनूमान् मारुतात्मजः।
वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरम्॥ **6.125.36** ॥

अनुशोचसि काकुत्स्थं स त्वां कौशलमब्रवीत्।
प्रियमाख्यामि ते देव शोकं त्यज सुदारुणम्॥ **6.125.37** ॥

अस्मिन् मुहूर्ते भ्रात्रा त्वं रामेण सह सङ्गतः।
निहत्य रावणं रामः प्रतिलभ्य च मैथिलीम्॥ **6.125.38** ॥

उपयाति समृद्धार्थः सह मित्रैर्महाबलैः।
लक्ष्मणश्च महातेजा वैदेही च यशस्विनी।
सीता समग्रा रामेण महेन्द्रेण शची यथा॥ **6.125.39** ॥

एवमुक्तो हनुमता भरतः कैकयीसुतः।
पपात सहसा हृष्टो हर्षान्मोहमुपागमत्॥ **6.125.40** ॥

ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः।
हनूमन्तमुवाचेदं भरतः प्रियवादिनम्॥ **6.125.41** ॥

अशोकजैः प्रीतिमयैः कपिमालिङ्ग्य सम्भ्रमात्।
सिषेच भरतः श्रीमान् विपुलैरश्रुबिन्दुभिः॥ **6.125.42** ॥

देवो वा मानुषो वा त्वमनुक्रोशादिहागतः।
प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम्॥ **6.125.43** ॥

गवां शतसहस्रं च ग्रामाणां च शतं परम्।
सकुण्डलाः शुभाचारा भार्याः कन्यास्तु षोडश॥ **6.125.44** ॥

हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः।
सर्वाभरणसम्पन्नाः सम्पन्नाः कुलजातिभिः॥ **6.125.45** ॥

निशम्य रामागमनं नृपात्मजः
    कपिप्रवीरस्य तदाद्भुतोपमम्।
प्रहर्षितो रामदिदृक्षयाभवत्
    पुनश्च हर्षादिदमब्रवीद् वचः॥ **6.125.46** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
पञ्चविंशत्यधिकशततमः सर्गः॥